# सिद्धान्तलेशसङ्ग्रहे प्रपञ्चमिथ्यात्वश्रुतेः उपजीव्यप्रत्यक्षविरोधपरिहारः

**- तुलसीकुमारजोशी**
वसन्तमहिलामहाविद्यालयः, वाराणसी

**यया यया भवेत् पुंसां व्युत्पत्तिः प्रत्यगात्मनि । सा सेह प्रक्रिया ज्ञेया साध्वी सा चानवस्थिता॥** इत्यभियुक्तोक्तिमनुसृत्य प्रतिपित्सुव्युत्पत्ति-वैचित्र्यमभिलक्ष्य विविधाभिः प्रक्रियाभिश्श्रुतितात्पर्यविषयीभूतं प्रत्यग्ब्रह्मैक्य- रूपम् अर्थं प्रतिपिपादयिषुराचार्यः श्रीमदप्पय्यदीक्षितेन्द्रः सिद्धान्तलेशसङ्ग्रहाख्ये ग्रन्थे द्वैतिनां पक्षतः प्राप्तायाः **"नेह नानास्ति किञ्चन"** **"एकमेवाद्वितीयं ब्रह्म"** इत्यादिश्रुतीनाम् अद्वैतसिद्ध्यनुकूलद्वितीयमिथ्यात्वरूपार्थबोधकत्वे श्रुत्युपजीव्यप्रत्यक्षविरोधशङ्कायाः परिहाराय प्रपञ्चमिथ्यात्वश्रुतेः उपजीव्यप्रत्यक्षविरोधपरिहाराख्यं प्रकरणं विरचयामास ।

अत्र प्रकरणे "केचित्तु" इत्यत आरभ्य मतचतुष्टयम् उपजीव्यविरोधाभावप्रदर्शनाय निरूपितम् । तेषां मतानां यथामति अत्र क्रमेण सङ्क्षेपेण च निरूपणं क्रियते । तत्रादौ द्वैतिपक्षतः मिथ्यात्वबोधकश्रुत्या सह उपजीव्यप्रत्यक्षविरोधाशङ्का कथं प्रसरति इति उच्यते –

**द्वैतिशङ्का –**

मिथ्यात्वबोधकागमस्य प्रत्यक्षापेक्षया प्राबल्यं निरूपयितुं न शक्यते । प्रत्यक्षसामान्यस्य श्रुत्युपजीव्यत्वेन प्रत्यक्षविरुद्धार्थबोधकत्वे श्रुतेरप्रामाण्यापत्त्या प्रत्यक्षाविरुद्धार्थप्रतिपादकतया एव तया भाव्यम् । तथा च **नेह नानास्ति किञ्चन** इत्यादिश्रुतेः न प्रपञ्चमिथ्यात्वबोधकत्वं सम्भवति । ननु कथं प्रत्यक्षस्य श्रुतिरुपजीविका इति चेत् उच्यते श्रुतेः वर्णपदादिस्वरूपत्वात् तया किञ्चिदर्थे बोधनीये वर्णपदादिस्वरूपग्राहकं मानं पूर्वमपेक्ष्यते । स्वरूपग्राहकमानाभावे श्रुतिस्वरूपासिद्धेः तस्याः किञ्चिदर्थबोधकत्वासम्भवात् । तच्चवर्णपदादिज्ञानं प्रत्यक्षेण जायते इति प्रत्यक्षानन्तरमेव ज्ञातस्वरूपकागमाः स्वतात्पर्यविषयीभूतार्थप्रतिपादने प्रवर्तन्ते । तथा च प्रत्यक्षमुपजीव्यैव स्वार्थबोधनसमर्थानाम् आगमानां प्रत्यक्षसिद्धप्रपञ्चसत्यत्वविरुद्धार्थबोधकत्वे उपजीव्यविरोधप्रसङ्गात् तत्परिहारार्थं नेह नानास्ति किञ्चन इत्याद्यागमाः प्रत्यक्षाविरुद्धार्थपरतयैव नेतव्या न तु प्रपञ्चमिथ्यात्वपरतया । ननु आगमस्य वर्णपदादिस्वरूपग्राहकप्रत्यक्षोपजीवकत्वेन तदपेक्षया प्राबल्यासम्भवेऽपि न प्रत्यक्षसामान्यापेक्षया प्राबल्यासम्भवः । तथा च प्रत्यक्षसामान्यस्य श्रुत्युपजीव्यत्वाभावेन उपजीव्यविरोधप्रसङ्गाभावेन न नेह नानास्तीत्याद्यागमापेक्षया घटपटादिप्रपञ्चसत्यत्वग्राहिप्रत्यक्षस्य प्राबल्यं निरूपयितुं शक्यते येन श्रुतेरन्यार्थपरत्वं वर्णनीयं स्यात् इति चेत् अत्रोच्यते - घटपटादिसत्त्वग्राहकप्रत्यक्षाणां वर्णपदादिस्वरूपग्राहकप्रत्यक्षसजातीयत्वात् तेषामपि श्रुत्युपजीव्यत्वेन श्रुत्यपेक्षया प्राबल्यं स्वीक्रियते । उपजीव्यसजातीयस्यापि उपजीव्यत्वेन प्राबल्यस्वीकारात् । अत एव नरशिरःकपालं शुचि प्राण्यङ्गत्वात् शङ्खवत् इत्यनुमानस्य **नारं स्पृष्ट्वा** इत्यशुचित्वबोधकागमेन बाधः । अत्रापि अशुचित्वबोधकः आगमः न अनुमानोपजीव्यः

किन्तु साध्यीभूतशुचिपदार्थस्यागमैकगम्यत्वेन शुचिपदार्थबोधकमागममुपजीवत्येवानुमानमिति अनुमानोपजीव्यागमसजातीयस्य अशुचित्वबोधकागमस्य उपजीव्यत्वेनैव शुचित्वग्राहकानुमानापेक्षया प्राबल्यं स्वीक्रियते । तथा प्रकृतेऽपि वर्णपदादिस्वरूपग्राहकप्रत्यक्षस्य आगमोपजीव्यत्वेन तत्सजातीयस्य प्रत्यक्षसामान्यस्यापि उपजीव्यत्वेन श्रुत्यपेक्षया प्राबल्यात् प्रत्यक्षाविरुद्धार्थप्रतिपादकत्वमेव आगमानां वक्तव्यम् । ननु प्रत्यक्षसामान्यस्य श्रुत्युपजीव्यत्वेऽपि प्रपञ्चमिथ्यात्वप्रतिपादकश्रुतीनां नोपजीव्यप्रत्यक्षविरुद्धार्थप्रतिपादकत्वम् आपादयितुं शक्यते । वर्णपदादिस्वरूपमुपजीव्य स्वार्थ-बोधने प्रवृत्ताभिः मिथ्यात्वबोधकश्रुतिभिः प्रपञ्चगतसत्यत्वांशस्य अनुपजीवनात् प्रपञ्चे सत्यत्वांशोपमर्दनेऽपि उपजीव्यवर्णपदादिस्वरूपांशानुपमर्दनात् नोपजीव्य-विरोधः क्रियते इति चेत्प्रपञ्चस्वरूपोपमर्दं विना अद्वैतासिद्धेः अद्वितीयब्रह्मवादिभिः नेह नानास्तीत्यादिश्रुत्या ब्रह्मणि प्रपञ्चस्य स्वरूपेणैव त्रैकालिकनिषेधस्य स्वीकर्तव्यतया प्रपञ्चस्वरूपोपमर्दनस्वीकारात् भवत्येवोपजीव्यविरोध इति**द्वैतिमतम्** ।

**अद्वैतसिद्धान्तः-**

उक्ताक्षेपनिरासाय ग्रन्थकारैः सिद्धान्तलेशसङ्ग्रहाख्ये ग्रन्थे मतचतुष्टयोपन्यासः कृतः । तान्येव मतान्यत्र सङ्ग्रहेण यथामति निरूप्यन्ते -

**केचित्तुमतम्**

वर्णपदादिस्वरूपं न शाब्दबोधोपजीव्यं किन्तु तज्ज्ञानमेव । तच्च भ्रमप्रमासाधारणमेव ज्ञानत्वेन शाब्दबोधं प्रति कारणम् । तथाहि केनचित्पुरुषेण वृषमानयेत्युक्तेऽपि वृषभमानयेति श्रुतवतः पुरुषस्य प्रमात्मक एव शाब्दबोधो जायते । प्रमात्मकस्यैव वर्णपदादिज्ञानस्य शाब्दबोधजनकत्वे तु उक्तस्थले प्रमात्मकशाब्दबोधो न स्यादतः भ्रमप्रमासाधारणस्य वर्णपदादिस्वरूपज्ञानमात्रस्य शाब्दबोधं प्रति कारणत्वं स्वीकार्यम् । प्रकृतेऽपि नेह नानास्ति किञ्चन इत्यादिस्थले भ्रमात्मकस्यैव वर्णपदादि-स्वरूपावगाहिज्ञानस्य कारणत्वं वक्तव्यं न तु वर्णपदादिस्वरूपस्यापि । तथा च नेह नानास्तीत्यादिश्रुत्या वर्णपदादिस्वरूपस्यानुपजीवनात् तस्य स्वरूपेण निषेधेऽपि नास्त्युप-जीव्यविरोधप्रसङ्गः । ननु भ्रमस्यापि प्रपञ्चान्तर्गततया तस्यापि स्वरूपेणैव निषेधः श्रुत्या प्रतिपादनीय इति स्वोपजीव्यस्य स्वरूपेण निषेधाद्भवत्येवोपजीव्यविरोध इति चेदत्रोच्यते भ्रमस्यापि वृत्तिप्रतिफलितचैतन्यस्वरूपत्वात् तत्र वृत्त्यंशस्य स्वरूपेण निषेधेऽपि चैतन्यांशस्य श्रुत्या अनिषेधात् चैतन्यरूपापरोक्षांशस्यैव वस्तुत उपजीव्यत्वेन नास्त्युप-जीव्यविरोधः । ज्ञानत्वेनैव ज्ञानस्योपजीव्यत्वाङ्गीकाराज्जडायाः वृत्तेरुपलक्षणतया तन्निषेधेऽपि तदुपलक्षितचैतन्यस्य निषेधाभावात् नास्ति कश्चिद्विरोधः ।

**अन्ये तु मतम्**

अन्ये तूक्ताक्षेपं प्रकारान्तरेण वारयन्ति । एतेषामयमभिप्रायः – शाब्दप्रमितिं प्रति वर्णपदादिस्वरूपस्य अनुपजीव्यत्वेऽपि पदार्थबाधाभावरूपयोग्यतास्वरूपं तु उपजीव्यं भवत्येव । यद्यपि प्रपञ्चान्तर्गतयोग्यताया अपि

स्वरूपेणैव नेहनानास्ति किञ्चन इत्यादिश्रुत्या भवति निषेधस्तथापि तावतानोपजीव्यविरोधः सम्भवति । ननु स्वरूपेण निषेधे कथं नोपजीव्यविरोध इति चेद् अत्रोच्यते – स्वरूपेण निषेधेऽपि प्रपञ्चस्य यावद्ब्रह्मज्ञानमनुवर्तमानं अर्थक्रियासंवादि असद्विलक्षणं स्वरूपम् अङ्गीक्रियत एव । तदनङ्गीकारे प्रत्यक्षादिव्यावहारिकप्रमाणानां विषयसिद्ध्यभावेन तेषां निर्विषयत्वप्रसङ्गात् । ननु निषेधस्य प्रतियोगिप्रतिक्षेपकत्वस्वाभाव्यात् यथा भूतले स्वरूपेण घटस्य निषेधे न घटस्य केनापि रूपेण स्थितिर्भवति तद्वत् अनया श्रुत्या प्रपञ्चस्य स्वरूपेण निषेधे कथं तस्य असद्वविलक्षणस्वरूपेणापि स्थितिः सम्भाव्यते । यदि च स्वरूपेण निषेधं स्वीकृत्य प्रतियोगिसत्त्वमेवाङ्गीक्रियेत तथा सति निषेधस्य प्रतियोगि- प्रतिक्षेपकत्वालाभेन निषेधत्वमेव व्याहन्येत । तथा चानया श्रुत्या न स्वरूपेण प्रपञ्चनिषेधः बोधयितुं शक्यत इति चेदत्रोच्यते – अस्ति कल्पितपदार्थानामभावस्य कश्चन विलक्षणः स्वभावः । कल्पितवस्तु-प्रतियोगिकाभावो हि यावता न अधिष्ठानस्वरूपावारककल्पितवस्तूपादाननिवृत्तिस्तावता स्वाधिकरणे कल्पितवस्तुरूपस्वप्रतियोगिप्रतिक्षेपको न भवति । यथा शुक्तौ विद्यमानोऽपि रजताभावः बाधपर्यन्तं रजतप्रतीत्यनुवृत्तेः सत्त्वात् रजतरूपप्रतियोगिप्रतिक्षेपको न भवति किन्तु रजतसत्तां सहते तद्वत् प्रपञ्चबाधपर्यन्तं वस्तुतः विद्यमानः प्रपञ्चाभावः प्रपञ्चप्रतीत्यनुरोधेन प्रपञ्चसत्तां सहते ।

**अपरे तु मतम्**

इदं मतं प्रपञ्चस्य व्यावहारिकं सत्त्वमङ्गीकृत्य प्रवृत्तम् । पूर्वस्मिन् मते तु प्रपञ्चस्य स्वरूपेण निषेधं स्वीकृत्य निषेधस्य प्रतियोगिप्रतिक्षेकत्वस्वभावविरोधःशुक्तिरजतदृष्टान्तेन प्रपञ्चस्य शुक्तिरजत-तुल्यसत्ताकत्वं स्वीकृत्य परिहृतः । एतन्मतानुसारेणप्रपञ्चस्य सत्यत्वेन ब्रह्मणि निषेधे नेह नानास्ति किञ्चनेत्यादिश्रुतेस्तात्पर्यम् । ननु श्रुतेः ब्रह्मणि प्रपञ्चस्य सत्यत्वेन निषेधे तात्पर्यमित्यस्य यदि ब्रह्मणि सत्यत्वविशिष्टप्रपञ्चनिषेध इत्यर्थः तदा असिद्धिः । ब्रह्मणि सत्यत्व-प्रपञ्चयोरुभयोरपि सत्त्वात् सत्यत्वविशिष्ट-प्रपञ्चनिषेधस्य तत्र वक्तुमशक्यत्वात् । यदा तु सत्यत्वावच्छिन्नप्रपञ्चमात्रनिष्ठप्रतियोगिताकोऽभाव इत्यर्थस्तदाऽपि न निस्तारः सत्यत्वावच्छिन्नत्वस्य प्रपञ्चेऽनङ्गीकारात् प्रतियोगितावच्छेदकविशिष्टप्रतियोग्यप्रसिद्ध्यैव निषेधा-सम्भवात् इति चेदत्रोच्यते - ब्रह्मणि प्रपञ्चस्य सत्यत्वेन निषेध इत्यस्य प्रपञ्चे सत्यत्वं निषिध्यते इत्येवार्थः अत्र मते स्वीक्रियते । तथा च प्रपञ्चं धर्मीकृत्य तत्र सत्यत्वनिषेधे नोक्तप्रकारेण विरोधशङ्काकलङ्कपङ्कतामुपैत्ययं पक्षः ।

ननु प्रपञ्चवत्प्रपञ्चसत्यत्वस्यापि सन्घटः इत्यादिप्रत्यक्षप्रतीतिसिद्धत्वात् कथं तत्र सत्यत्वनिषेधोऽपि श्रुतितात्पर्यविषयो भवितुमर्हतीति चेदत्रोच्यते – प्रपञ्चसत्यत्वविषयकप्रत्यक्षेण सह प्रपञ्चसत्यत्वनिषेधक-श्रुतेर्विरोधपरिहाराय प्रत्यक्षस्य व्यावहारिकसत्यत्वविषयकत्वमेव स्वीक्रियते श्रुत्या च प्रपञ्चे पारमार्थिकसत्यत्वं निषिध्यत इति उभयोर्विषयभेदान्नोक्तनिषेधस्य श्रुतितात्पर्यविषयत्वे कश्चिद्विरोधः । ननु प्रसक्तं हि निषिध्यते नाप्रसक्तमिति न्यायेन पारमार्थिकसत्यत्वस्य प्रपञ्चे प्रसक्तेरेवाभावात्कथं तन्निषेध इति चेदत्रोच्यते – यथा शुक्तौ रजताभासप्रतीतिरेव सत्यरजतप्रसक्तिः एवमेव प्रपञ्चे सत्यत्वाभासप्रतीतिरेव पारमार्थिकसत्यत्वप्रसक्तिरिति यथा 'नेदं रजतं, किन्तु तत्' इत्यादिप्रतीत्या शुक्तौ निषिध्यमानस्य रजतस्य अन्यत्र सत्त्वं प्रतीयते तद्वत् प्रपञ्चे न सत्यत्वं

किन्तु ब्रह्मणि इत्यस्यापि उपपत्तिः ।

**अन्ये तु मतम्**

एतन्मते सत्तैक्यपक्षमङ्गीकृत्यैव उपजीव्यविरोधपरिहारोऽभिप्रेतः । एतन्मते प्रपञ्चः सन् इत्यादिप्रतीतिविषयीभूतं सत्यत्वं न प्रपञ्चगतं किन्तु ब्रह्मगतमेव । न च तर्हि कथमप्रसक्तप्रतिषेध इति वाच्यम् ब्रह्मणः प्रपञ्चतादात्म्यापन्नत्वात् ब्रह्मगतमपि सत्यत्वमविवेकात् प्रपञ्चतादात्म्येन प्रतीयत इति प्रपञ्चे सत्यत्वप्रसक्तिरुपपद्यते । तथा चास्मिन्नपि मते प्रपञ्चे सत्यत्वस्यैव निषेधात् तस्य चानुपजीव्यत्वान्नोपजीव्यविरोधः ।

**उपसंहारः –**

अत्र उपजीव्यविरोधं परिहर्तुं समागतेषु मतेषु प्रथमे केचित्तुमते वर्णादिज्ञानस्यैव शाब्दबोधोपजीव्यत्वेन वर्णादीनां तदनुपजीव्यत्वेन तेषां स्वरूपेण निषेधेऽपि नोपजीव्यविरोध इत्येवं परिहारप्रकारश्चिन्तितः । द्वितीयमतं तु प्रपञ्चस्य प्रातिभासिकसत्त्वं बाधपर्यन्तानुवर्तनस्वभावत्वञ्चाङ्गीकृत्य प्रवृत्तम् । अस्मिन् मते प्रपञ्चस्य स्वरूपेण निषेधेऽपि न कश्चिद्विरोधः । अधिष्ठानसाक्षात्कारपर्यन्तं प्रपञ्चप्रतीतेरनुवृत्तौ बाधकाभावात् । तृतीयमते सत्तात्रैविध्यपक्षानुसारेण प्रपञ्चस्य व्यावहारिकसत्त्वमङ्गीकृत्याऽपि विरोधपरिहारः कृतः। अत्र मते प्रपञ्चस्य स्वरूपेण निषेधः न कृतः किन्तु तत्र सत्यत्वनिषेध एव कृतः । प्रपञ्चसत्यत्वस्य चानुपजीव्यत्वात् न कश्चिद्विरोधः । अन्त्यमतं सत्तैक्यपक्षमादाय प्रवृत्तः अत्रापि विरोधपरिहारः अनन्तरपूर्वोक्तमतरीत्यैव कृतः ।